हरिद्रा
(सांस्कृतिक शोध का अन्तर्राष्ट्रीय उपक्रम)
ISSN : 2582-9092

# ॥ काव्यप्रकाशमनुसृत्य दोषविचारः ॥

## पराग जोशी

संक्षिप्तिः शोधपत्रेस्मिन् प्रामुख्येन आचार्यमम्मटमतमनुसृत्य काव्यदोषाणां विश्लेषणं विधीयते। अलंङ्कारशास्त्रे भरतमुनेः नाट्यशास्त्रमारभ्य अद्य यावत् काव्यदोषाणां स्वरूपविचारः सर्वत्र ग्रन्थेषु ईशद्भेदपुरःस्सरं प्रतिपादितः वर्तते। तत्र काव्यप्रकाशे आचार्यमम्मटः काव्यदोषं तत्स्वरूपञ्च कथं व्याख्याति, अन्यग्रन्थेभ्यो अत्र को भेदः, किं वा वैशिष्ट्यमित्यादि लक्षणमुद्धृत्य प्रतिपादयितुमत्र प्रयासः क्रियते। अपि च रसदोषाः, दोषापवादाश्च के इत्यादिविषये आचार्यमम्मटस्य विशिष्टं यन्मतं विद्यते तदपि सोदाहरणमत्र उदाह्रियते। एवं च प्रामुख्येन काव्यदोषाः, तत्स्वरूपं, भेदाः एवं च वैशिष्ट्यं पुरोधाय काव्यप्रकाशकारस्य मतानां तदितराणामाचार्याणाञ्च तुलनया साररूपेण प्रतिपाद्यते।

**सरस्वती स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम्।**
**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभावशेषम्॥**

सूक्तिरियमलौकिकानां प्रति भावतां कवीनां लेखकानाञ्च सरस्वतीं वर्णयति। ईदृशनिरूपमधिषणावै वसमासादितः आचार्यमम्मटः आसीत. तस्मादेव सः वाग्देवतावतारः इति बिरुदेन सम्मानितः अद्यापि सगौरवं स्मर्यते अलङ्कारशास्त्रे। अनेकासु टीकासु काव्यप्रकाशस्य सारग्रहणाय यथाशक्तिः बहुभिः प्रयासः विहितः तथापि अयं सुदुर्लः इति श्रूयते। काव्यप्रकाशस्य सुधासागर टीकाकारः भीमसेनस्तु आचार्यमम्मटं स्तौति इत्थं –

**शब्दब्रह्मसनातनं न विदितं शास्त्रैः क्वचित् केनचित्।**
**तद्देवी हि सरस्वती स्वमभूत् काश्मीरदेशे पुमान्।।**
**श्रीमज्जैयटगेहिनीसुजठराज्जन्माप्य युग्मानुजः।**
**श्रीमन्मम्मटसंज्ञया श्रिततनुं सारस्वतीं सूचयन्।।**
**मर्यादां किल पालयन् शिवपुरीं गत्वा प्रपठ्यादरात्।**
**शास्त्रं सर्वजनोपकाररसिकः साहित्यसूत्रं व्यधात्।**
**तत् वृत्तिं विरचय्य गूढमकरोत् काव्यप्रकाशं स्फुटं।।**
**वैदग्ध्येकनिदानमर्थिषु चतुर्वर्गप्रदं सेवताम्।**
**कस्तस्य स्तुतिमाचरेत् कविरहो को वा गुणान् वेदितुम्।**
**शक्तः स्यात् किल मम्मटस्य भुवने वाग्देवता रूपिणः।।**

ईदृशोऽयं प्रतिभावान् आचार्यः मम्मटः स्वीयग्रन्थे अलङ्कारशास्त्रस्य काव्यस्य साङ्गोपाङ्गं विवेचनं क्रमशः विद्याय काव्यसौन्दर्याधायकानां तत्वानां निरूपणमकरोत्। वस्तुतः शास्त्रमिदं वेदादेव सामग्रीमादाय क्रमशः विकसितमभवत्। तथापि विद्वांसस्तु अलङ्कारशास्त्रस्य ऐतिह्यं चतुर्धा विभज्य इत्थं ब्रुवन्ति–

1. प्रारम्भिकः कालः (अज्ञातकालात् भामहं यावत्) 1 तः 6 शताब्दम्
2. रचनात्मकः कालः (भामहात् आनन्दवर्धनं यावत्) 6 तः 8 शताब्दम्।
3. निर्णयात्मकः कालः (आनन्दवर्धनात् मम्मटपर्यन्तम्) 8 तः 10 शताब्दम्।
4. व्याख्यानात्मकः कालः(मम्मटात् जगन्नाथपण्डितं यावत्) 10 तः 17 शताब्दम्।

ISSN : 2582-9092

भरतमुनेः नाट्यशास्त्रमारभ्य शास्त्रस्यास्य आरम्भः लौकिकत्वेन स्वीक्रियते। प्रारम्भ काले भरत भामहावेव मुख्यावाचार्यौ। एतयोः काले शास्त्रस्यास्य प्रमुखानां सिद्धान्तानां तत्वानाञ्च बीजावाप्तिः समजनि। पश्चाच्च विभिग्रन्थानां रचनया कालेस्मिन् अलङ्कारारीतिरसध्वन्यादि प्रमुख काव्य शास्त्रीय सम्प्रदायानां रचना अभवत्। तदनन्तरकाले प्रतिपादितेषु अन्यतम सिद्धान्तानां निर्णयो सञ्जातः। तदनु काले विभिन्नैराचार्यैः स्वग्रन्थेषु पूर्वप्रतिपादितानां सिद्धान्तानां व्याक्यानेन, विश्लेषणेन, समीक्षया, च कालोऽयं समन्वयकालः इति प्रसिद्धिं गतः। तत्रापि आचार्य मम्मटः अलङ्कार शास्त्र संबन्धिनः सिद्धान्तान् विषयांश्च स्वालौकिकया प्रति या समन्वयात्मिकायां शैल्यां न्यरूपयत्। काव्यप्रकाशं प्रणीयालंकारिकानां समक्षे स्वस्मात् प्राग्वर्तिन्यां सहस्त्राब्द्यां सञ्जातानामाचार्याणांङ्कृतीः सम्यगवगाह्य तासां सारभागं विषयांश्च सर्वान् आदाय लीलया प्रास्तौत् काव्यप्रकाशे। ग्रन्थस्यास्य सप्तमोल्लासे दोषस्वरूपं तद्भेदांश्च व्याख्याय पश्चात् गुणविवेचनमकरोत्। अत्रेयं जिज्ञासा स्फुरति यत् गुणानां प्राक् दोषस्य विवेचनं कस्मात्? चेद् उच्यते–

**गुणदोषौ बुधो गृह्णन् इन्दुक्ष्वेडाविवेश्वरः।**
**शिरसा श्लाघते पूर्वं परं कण्ठे प्रयच्छति।।**

अर्थात् दोषः न वाच्यः। न वा श्लाघनीयः तस्मात् दोषज्ञानं सर्वादावपेक्षितम्। अपि च उच्यते अमरकोशे यत् विद्वान् विपश्चित् दोषज्ञः। इति। नाम यः दोषमवगन्तुं शक्नोति स एव खलु तन्निवारयितुं समर्थः तस्मात् बुध ापर्यायत्वेन व्याहृतः दोषज्ञः। पुनश्च आरम्भे काव्यलक्षणस्य प्रतिपादनावसरे तददोषौ शब्दार्थौ इति प्रतिपाद्य काव्यजिज्ञासुना चिकीर्षुना वा दोषपरिहाराय दोषज्ञानमादौ प्राप्तव्यमिति सूचितम्। अपरात्रापि उच्यते यत्–

**तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।**
**स्याद्वपुः सुन्दरमपि श्वित्रेणैकेण दुर्भगम्।।**

**तस्मादेव आचार्य मम्मटः काव्यलक्षणे प्रथमं प्राह अदोषौ शब्दार्थौ काव्यमिति।**

**को नाम दोष इति जिज्ञासायां प्राह आचार्यमम्मटः–**

**मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयः।**
**उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः।।**

मुख्यार्थस्यापकर्षकः यः सः दोषः। अत्र लक्षणे हतिर्नाम न नाशः अपि तु अपकर्षः इत्येव। मुख्यार्थः नाम न वाच्यार्थः अपि तु रसः यदुक्तं रसश्च मुख्यः तदाश्रयात् वाच्यार्थस्य अपकर्षकः यः सोऽपि दोषः। इत्थं वाच्यार्थस्य बोधने उपकारकाः शब्दादयः एवं रसस्य बोधने अपकारकाः येऽन्ये तेषां अपकर्षकत्वेऽपि दोषत्वम्। अर्थात् पद–वाक्य– अर्थ– रसानां यः अपकर्षकः सः दोषः इति। तदेव उच्यते अन्यत्र यथा– साक्षात् परंपरया वा रसादीनां सम्यक् प्रतीति प्रतिबन्धकत्वे सति काव्यवृत्तित्वमिति दोषस्य सामान्यस्वरूपम्। तथा च काव्यवृत्तित्वे सति काव्य प्रयोज्यचमत्कृत्यपकर्षकत्वम्, स्वभाव विशिष्ट काव्य प्रयोज्य चमत्कृतेः प्रतिबन्धकत्वमिति दोषसामान्यलक्षणं पर्यवस्यति।

1. पददोषाः– दुष्टं पदं श्रुतिकटुच्युत्संस्कृत्यप्रयुक्तमसमर्थम्।
निहितार्थमनुचितार्थं निरर्थकमवाचकमं त्रिधाऽश्लीलम्।
सन्दिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत्क्लिष्टम्।
अविमृष्टविधेयांशं विरूद्धमतिकृत्समासगतमेव।।

ISSN : 2582-9092

एवं पददोषान् प्रतिपाद्य उपरिनिर्दिष्टपददोषेषु कतिचित् पदांशगतदोषाः अपि भवन्ति इति वदति।

2. पदांशदोषाः— अपास्य च्युतसंस्कारमसमर्थमनर्थकम्।

वाक्येपि दोषाः सन्त्येते पदस्यांशेपि केचन।

3. वाक्यदोषाः— साकाङ्क्षनानापदवृत्तिदोषो वाक्यदोषः। अपि च विशिष्टैकार्थतात्पर्यकपदसमूहो वाक्यं तदपेक्षदोषत्वमेव वाक्यदोषत्वम्। ते च एवं

प्रतिकूलवर्णमुपहताप्लुतविसर्गविसन्धिहतङ्कतम्।

न्युनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरावृत्तम्।

अर्धान्तरैकवाचकम वन्मतयोगमनभिहितवाच्यम्।

अपदपदसमासं संकीर्णगर्भितं प्रसिद्धिहतम्।

भग्नप्रक्रममक्रममतपरार्थं च वाक्यमेव तथा

4. अर्थदोषाः— त्रयोविंशति अर्थदोषाः तत्र प्रतिपादिताः काव्यप्रकाशे

अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः।

सन्दिग्धो निहैतुः प्रसिद्धिविद्याविरुद्धञ्च।

अनवीङ्कतः सनियमानियमविशेषाविशेषपरिवृत्ताः।

साकाङ्क्षो पदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः।

विन्ध्यनुवादायुक्तस्त्यक्तपुनः स्वीङ्कतोऽश्लीलः।।

5. रसदोषाः—

व्यभिचारिरसस्थायि भावानां शब्दवाच्यता।

कष्टकल्पनया व्यक्तिरनुभाववि भावयोः।

प्रतिकूलवि भावादिग्रहो दीप्तिः पुनः पुनः।

अकाण्डे प्रथनच्छेदौ अङ्गस्याप्यतिविस्तृतिः।

अङ्गिनोऽननुसन्धानं प्रङ्कतीनां विपर्ययः।

अनङ्गस्याभिधानञ्च रसे दोषाः स्युरिदृशाः।।

भरतादारभ्य विश्वनाथपर्यन्तमनेके आचार्याः दोषाणां विवेचनमकार्षुः। दोषानां वर्गीकरण सर्वप्रथमं वामनेन ङ्कतम्। तथापि वक्तुमेतद् शक्यते यत् दोषस्य सर्वाधिक सन्तुलितविवेचनं ङ्कतम् आचार्यमम्मटेन काव्यप्रकाशे। ग्रन्थेऽस्मिन् सर्वप्रकाराणां दोषाणां समावेशोऽ वत्। तत्र नित्यानित्यस्वरूपेण द्विविधः प्रदर्शितः दोषः। प्रकारान्तरेणापि समाधातुम् अशक्यः नित्यदोषः यथा च्युतसंस्ङ्कत्यादिः। एतद्विपरीतस्तु अनित्यः। क्वचित् कश्चनदोषः विशिष्टरपरिस्थितौ दोषत्वं नारोहति क्वचिच्च गुणत्वं प्राप्नोति। एतत् सर्वं विज्ञाय काव्यप्रकाशे आचार्यमम्मटेन दोषापवादाः प्रतिबोधिताः यथा—

कर्णावतंसादिपदे कर्णाभिध्वनिनिर्मितिः। सन्निधानादि बोधार्थम्।

ख्यातेऽर्थे निर्हेतोरदुष्टता

अनुकरणे तु सर्वेषाम्

वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणः क्वचित् क्वचिन्नोभौ

क्वचिन्नीरसे (क्लिष्टत्वं) न गुणो न दोषः।
अप्रयुक्तनिहितार्थौ श्लेषादावदुष्टौ
अश्लीलं क्वचित्गुिणः, यथा सुरतारम्भगोष्ठ्याम्।
अधमप्रङ्घुत्युक्तिषु ग्राम्यत्वं गुणः
न दोषः स्वपदेनोक्तावपि सञ्चारिणः क्वचित्।
सञ्चार्यादेर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा।

आचार्यमम्मटेन केषाञ्चित् दोषाणां परिस्थितिवशात् अदोषता दर्शिता। मम्मटाचार्यैः इदमपि स्फुटीङ्घतं यच्चमत्कारजनकतया स्थितेषु महाकविप्रयुक्तेषु पदेष्वेतत् समर्थनम्, न तु स्वेच्छया जघनकाञ्च्यादि प्रयोगेऽपि। आचार्यः नैकदोषाणामदोषत्वं गुणत्वं चोपपाद्य पुनरुक्तवान् यद् एवमेवान्यत्रापि अविशिष्टेष्वपि दोषेषु अदोषत्वविषये विचारः कर्तुं शक्यते। एवं तन्मते प्रायः सर्वे दोषा अवस्थाविशेषे अनित्याः सन्तो दोषत्वं वक्तुमर्हाः। इति शम्।

**सन्दर्भ ग्रन्थाः**

1. काव्यप्रकाशः आचार्यविश्वेश्वरव्याख्या, सुरभारती प्रकाशन, दिल्ली
2. भारतीय साहित्य मीमांसा– डॉ. जगन्नारायणपाण्डेयः, जगदीशपुस्तकालय, जयपूर
3. अलङ्कारशास्त्रस्येतिहासः– डॉ. जगदीशचन्द्र मिश्रः, चौखम्बा प्रकाशन, वाराणसी

सहा. प्राध्यापकः,
साहित्य विभागः क.का.सं वि., रामटेकम्,
महाराष्ट्र